## ॥ अथ अच्युताष्टकम् ॥

अच्युतं केशवं रामनारायणं  कृष्णदामोदरं वासुदेवं हरिम् ॥
श्रीधरं माधवं गोपिकावल्लभं  जानकीनायकं रामचन्द्रं भजे ॥ १ ॥

अच्युतं केशवं सत्यभामाधवं  माधवं श्रीधरं राधिकाराधितम्॥
इन्दिरामन्दिरं चेतसा सुन्दरं  देवकीनन्दनं नन्दजं सन्दधे ॥ २ ॥

विष्णवे जिष्णवे शङ्खिने चक्रिणे  रुक्मिणीरागिणे जानकीजानये ॥
वल्लवीवल्लभायाऽर्चितायात्मने  कंसविध्वंसिने वंशिने ते नमः ॥ ३ ॥

कृष्ण गोविन्द हे राम नारायण  श्रीपते वासुदेवाजित श्रीनिधे ॥
अच्युतानन्त हे माधवाधोक्षज  द्वारकानायक द्रौपदीरक्षक ॥ ४ ॥

राक्षसक्षोभितः सीतया शोभितो  दण्डकारण्यभूपुण्यताकारणम् ॥
लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम्  ॥ ५ ॥

धेनुकारिष्टकोऽनिष्टकृद् द्वेषिणां  केशिहा कंसहृद्  वंशिकावादकः ॥
पूतनाकोपकः सूरजाखेलनो  बालगोपालकः पातु मां सर्वदा ॥ ६ ॥

विद्युदुद्योतवत् प्रस्फुरद्वाससं  प्रावृडम्भोदवत्  प्रोल्लसद्विग्रहम्।
वन्यया मालया शोभितोरःस्थलं  लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥ ७ ॥

कुञ्चितैः कुन्तलैर्भ्राजमाननं  रत्नमौलिं लसत्कुण्डलं गण्डयोः ॥
हारकेयूरकं कङ्कणप्रोज्ज्वलं  किङ्किणीमञ्जुलं श्यामलं तं भजे ॥ ८ ॥